॥ श्री ॥
अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचित:
॥ श्री मध्वविजय: ॥
४. चतुर्थ: सर्ग:

अथैष सल्लोकदयासुधार्द्रया सदागमस्तेननिरासकामया ।
रमावरावासभुवा विशारदो विशालयाऽचिंतयदात्मनो धिया ॥ ४.१ ॥

अनन्यसंगाद गुणसंगिता हरेर्जनस्य मानं तु विशिष्टचेष्टितम ।
असंगमस्मात प्रकटीकरोम्यहं निजं भजन पारमहंस्यमाश्रमम ॥ ४.२ ॥
मम प्रभोर्नापरथा हि शोभते द्विषत्सु विष्णुं यददंडधारणम ।
हरिस्वसा नन्वचिरादसद्भिदे भवेदतो नास्मिच दंडधारक: ॥ ४.३ ॥

विचिंतयन्नित्थमनंतचिंतक: समस्तसंन्यासनिबध्धनिश्चय: ।
असावनुजजार्थमथानमद्धरिं समस्तसंव्यापिनमात्मदायगम ॥ ४.४ ॥

निजे जने किं नमसीति पृच्छति ब्रुवन स्वसस्तुप्रणतिं व्यधामिति ।
गुरो किलान्वेषणवान जगद्गुरु: तदा जगामाखिललोकशिक्षक: ॥ ४.५ ॥

यतिर्यतात्माभुवि कश्चनाभवद्विभूषणो भूरिविरक्तिभूषण: ।
न नाममात्राच्छुचिमर्थतोऽपियं जनोऽच्युतप्रेक्षमुदाहरत स्फुटम ॥ ४.६ ॥

पुरैष कृष्णाकरसिद्धशुद्धिमद्वरान्नभुक्त्या किल पांडवालये ।
विशोधितात्मा मधुकृत्प्रवृत्तिमान्चचार कांश्चित परिवत्सरान मुदा ॥ ४.७ ॥

अभूत कुशास्त्राभ्यसनं न पातकं क्रमागताद विप्रतिसारतो यते: ।
यथा कुशास्त्राध्यसनं मुरद्विष: पदांबुजे व्याधवरस्य गर्हितम ॥ ४.८ ॥

विनीतमांनायशिरोविशारदं सदैव तत्त्वं प्रबुभुत्सुमादरात ।
गुरुर्विदित्वोपनतां निजां मृतिं कदाचिदूचे तमुपह्वरे गिरम ॥ ४.९ ॥

www.yousigma.com

अहं स्वयं ब्रह्मन किंचिदस्ति मत परं विजृंभेत यदा स्फुटं चितिः ।
इतीह मायासमयोपपादितं निरन्वयात सुव्रत मा स्म विश्वसीः ॥ ४.१० ॥

यदेतदात्मैक्यमुपास्तिचोदितं न मे गुरोरप्यपरोक्षतां गतम ।
पुरातनानामपि सौम्य कुत्रचित ततो मुकुंदं भज संविदे मुदा ॥ ४.११ ॥

इतीदमादिश्य वचो वचस्विनि स्वके गुरौ लोकमथान्यमीयुषि ।
असेवताऽलोच्य मुहुर्गुरोर्गिरं स रूप्यपीठालयमिंदिरावरम ॥ ४.१२ ॥

सुभक्तिना तेन स भक्तवत्सलो निषेवितस्तत्र परं बुभुत्सुना ।
भविष्यतः शिष्यवराद्धि विद्धि माम इति प्रविष्टः पुरुषं तमभ्यधात ॥ ४.१३ ॥
प्रतीक्षमाणं तमनुग्रहं मुदा निषेवमाणं पुनरंबुजेक्षणम ।
सतां गुरुः कारणमानुषाकृतिः यतिं प्रशांतं तमुपाससाद सः ॥ ४.१४ ॥

सुतं यतींद्रानुचरं विरागिणं निशम्य संन्यासनिषण्णमानसम ।
सुवत्सलौ रूप्यतळालयस्थितं वियोगतांतौ पितरौ समीयतुः ॥ ४.१५ ॥

वराश्रमस्ते जरतोरनाथयोर्न जीवतोः स्यादयि नंदनावयोः ।
सयाचनं वाक्यमुदीर्य ताविदं परीत्य पुत्राय नतिं वितेनतुः ॥ ४.१६ ॥

नतिर्न शुश्रूषुजनाय शस्यते नतं भवद्भ्यां स्फुटमत्र संप्रतम ।
अहो विधात्रा स्वयमेव दापिता तदभ्यनुज्ञेति जगाद स प्रभुः ॥ ४.१७ ॥

अनुत्तरज्ञः स तमर्थयन पुनः यतींद्रमानम्य गतः प्रियायुतः ।
गृहे वसन कल्पसमान क्षणान नयन सुताननेंदोरनिशं ततोऽस्मरत ॥ ४.१८ ॥

स चिंतयन पुत्रमनोरथं शुचा पुनश्च तीर्त्वोपगतो महानदीम ।
यतीश्वरानुव्रतमात्मनंदनं तमैक्षत ग्रामवरे मठांतरे ॥ ४.१९ ॥

स जातकोपाकुलितो धरासुरो महात्मनाम लंघनभीरुरप्यलम ।
सुतस्य कौपीनधृतौ हि साहसप्रतिश्रवो मे दृढ इत्यभाषत ॥ ४.२० ॥

क्षणेन कौपीनधरो निजं पटं विदार्य हे तात कुरुष्व साहसम ।
इतीममुक्त्वा प्रभुरब्रवीत पुनः शुभांतरायं न भवांश्चरेदिति ॥ ४.२१ ॥

न पुत्र पित्रोरवनं विना शुभं वदंति संतो ननु तौ सुतौ मृतौ ।
निवर्तमाने न हि पालकोऽस्ति नौ त्वयीति वक्तारममुं सुतोऽब्रवीत ॥ ४.२२ ॥

यदा विरक्तः पुरुषः प्रजायते तदैव संन्यासविधिः श्रुतौ श्रुतः ।
न संगहीनोऽपि परिव्रजामि वाम अहं तु शुश्रूषुमकल्पयन्निति ॥ ४.२३ ॥

बहुश्रुतत्वाद्यदि तत सहे बलात न सा सवित्री विरहं सहेत ते ।
इति द्विजेनाभि हितेऽनमत स तं भवाननुज्ञां प्रददात्विति ब्रुवन ॥ ४.२४ ॥

विचिंत्य विद्वान स निरुत्तरीकृतः तथाऽस्तु माताऽनु वदेद यदीति तम ।
उदीर्य कृच्छ्रादुपगम्य मंदिरं प्रियासकाशे तमुदंतमब्रवीत ॥ ४.२५ ॥

निशाचरारेरिव लक्ष्मणः पुरा वृकोदरस्येव सुरेंद्रनंदनः ।
गदोऽथ शौरेरिव कर्मकृत प्रियः सुभक्तिमान विश्वविदोऽनुजोऽभवत ॥ ४.२६ ॥

कदाचिदाप्याऽलयबुद्धिरालयं निवेदयन पालकमेतमेतयोः ।
दृढस्वसंन्यासनिषेधनिश्चयां धवानुमत्येदमुवाच मातरम ॥ ४.२७ ॥
वराश्रमाप्तिं मम संवदस्व मां कदाचिदप्यंब यदीच्छसीक्षितुम ।
यदन्यथा देशमिमं परित्यजन न जातु दृष्टेर्विषयो भवामि वः ॥ ४.२८ ॥

इति ब्रुवाणे तनये कदाचिदप्यदर्शनं तस्य मृतेर्निदर्शनम ।
विचिंत्य पर्याकुलिता चिकीर्षितं सुतस्य कृच्छ्रान्न्यरुणन्न सा शुभा ॥ ४.२९ ॥

अथोपगम्यैष गुरुं जगद्गुरुः प्रसाद्य तं देववरप्रसादितः ।
सदा समस्ताश्रमभाक सुरेश्वरो विशेषतः खल्वभजद्वराश्रमम ॥ ४.३० ॥

क्रियाकलापं सकलं स कालविद विधानमार्गेण विधाय केवलम ।

सदा प्रसन्नस्य हरेः प्रसत्तये मुहुः समस्तन्यसनं समभ्यधात ॥ ४.३१ ॥

अनंतमात्रांतमुदाहरंति यं त्रिमात्रपूर्वं प्रणवोच्चयं बुधाः ।
तदाऽभवद भाविचतुर्मुखाकृतिः जपाधिकारी यतिरस्य सूचितः ॥ ४.३२ ॥

गुणानुरूपोन्नति पूर्णबोध इत्यमुष्य नाम द्विजवृंदवंदितः ।
उदाहरद भूरियशा हि केवलं न मंत्रवर्णः स च मंत्रवर्णकः ॥ ४.३३ ॥

निरंगरागं मुखरागवर्जितं विभूषणं विष्टपभूषणायितम ।
अमुं धृताषाढमवेक्ष्य मेनिरे स्वभावशोभाऽनुपमेति जंतवः ॥ ४.३४ ॥

भुजंगभूतेशविहंगपादिकैः प्रवंदितः सावसरप्रतीक्षणैः ।
ननाम सोऽयं गुरुपूर्वकान यतीन अहो महीयो महतां विडंबनं ॥ ४.३५ ॥

वराश्रमाचारविशेषशिक्षणं विधित्सुरस्याऽचरितं निशामयन ।
विशेषशिक्षां स्वयमाप्य धीरधीः यतीश्वरो विस्मयमायताऽंतरम ॥ ४.३६ ॥

स रूप्यपीठालयवासिने यदा ननाम नाथाय महामतिर्मुदा ।
तदाऽमुनाऽग्राहि नरप्रवेशिना भुजे भुजेऽनाशु भुजंगशायिना ॥ ४.३७ ॥

चिरात सुतत्वं प्रबुभुत्सुना त्वया निषेवणं मे यदकारि तत्फलम ।
इमं ददामीत्यभिधाय सोऽमुना तदा प्रणीय प्रददेऽच्युतात्मने ॥ ४.३८ ॥

अनुग्रहं तं प्रतिगृह्य साग्रहं मुदाऽऽत्मनाऽऽप्तां कृतकृत्यतां स्मरन ।
अभूदसंगोऽपि स तत्सुसंगवान असंगभूषा ननु साधुसंगिता ॥ ४.३९ ॥
यियासति स्वस्तटिनीं मुहुर्मुहुः नमत्यनुज्ञार्थिनि भूरिचेतसि ।

तमस्मरत स्वामिनमेव दूनधीः गुरुर्भविष्यद्विरहाग्निशंकया ॥ ४.४० ॥
इतस्तृतीये दिवसे द्युनिम्नगा त्वदर्थमास्माकतटाकमाव्रजेत ।
अतो न याया इति तं तदाऽवदत प्रविश्य कंचित करुणाकरो हरिः ॥ ४.४१ ॥
तदाज्ञयोपागतजाह्नवीजले जनोऽत्र सस्नौ सह पूर्णबुद्धिना ।

ततःपरं द्वादशवत्सरांतरे सदाऽऽव्रजेत सा तदनुग्रहांकिनी ॥ ४.४२ ॥

गते दिनानां दशके समासके वराश्रमं प्राप्य सपत्रलंबनम ।
जिगाय जैत्रान बहुतर्ककर्कशान स वासुदेवाह्वयपंडितादिकान ॥ ४.४३ ॥

गुरोः स्वशिष्यं चतुरं चिकीर्षितः प्रचोदनात श्रोतुमिहोप चक्रमे ।
अथेष्टसिद्धिश्फलजातिवारिधिः निरादरेणापि महात्मनाऽमुना ॥ ४.४४ ॥

तदाद्यपद्यस्थमवद्यमंडलं यदाऽवदत षोडशकद्वयात्मकम ।
उपर्यपास्तं तदिति ब्रुवत्यसौ गुरौ तमूचे प्रणिगद्यतामिति ॥ ४.४५ ॥

भवत्प्रवक्तृत्वसमर्थता न मे सकोपमित्थं वदति व्रतीश्वरे ।
अपीह मायासमये पटौ नृणां बभूव तद्दूषणसंशयांकुरः ॥ ४.४६ ॥

बुधोऽभिधानं श्रवणं बुधेतरो ध्रुवं विदध्याद विमुमुक्षुरात्मनः ।
यतिर्विशेषादिति लोकचोदनात प्रवक्ति मायासमयं स्म पूर्णधीः ॥ ४.४७ ॥

अखंडितोपन्यसनं विसंशयं ससंप्रदायं प्रवचो दृढोत्तरम ।
समागमन श्रोतुममुष्य साग्रहाः जनाः श्रुताढ्याश्चतुरा बुभूषवः ॥ ४.४८ ॥

गुरोरुपांते श्रवणे रतैर्द्विजैः स पंचषैर्भागवते कदाचन ।
बहुप्रकारे लिखितेऽपि वाचिते प्रकारमेकं प्रभुरभ्यधाद दृढम ॥ ४.४९ ॥

परप्रकारेष्वपि संभवत्सु ते विनिर्णयोऽस्मिन कथमित्युदीरिते ।
मुकुंद बोधेन महाह्वदब्रवीत प्रकारमेनं भगवत्कृतं स्फुटम ॥ ४.५० ॥
निगद्यतां गद्यमिहैव पंचमे जगद्गुरोर्वेत्थ कृतिस्थितिं यदि ।
इति ब्रुवाणे यतिसत्तमे स्वयं तदुक्तमार्गेण जगाद भूरिह्वत ॥ ४.५१ ॥

अशेष शिष्यैश्च तदाज्ञया तदा परीक्षणायैक्षि समस्तपुस्तकम ।
स तत्र हंतैकतमे स्थितं त्यजन न तावदध्याय निकायमभ्यधात ॥ ४.५२ ॥

अत्र जन्मनि न यत पठितं ते जैत्र भाति कथमित्यमुनोक्ते ।
पूर्वजन्मसु हि वेद पुरेदं सर्वमित्यमितबुद्धिरुवाच ॥ ४.५३ ॥

इति बहुविधविश्वाश्चर्यचित्तप्रवृत्तेः
जगति विततिमायन्नूतनाऽप्यस्य कीर्तिः ।
क्षपिततततमस्का भास्करीव प्रभाऽलं
सुजनकुमुदवृंदानंददा चंद्रिकेव ॥ ४.५४ ॥

॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत
नारायणपंडिताचार्यविरचिते श्रीमध्वविजये
आनंदांकिते चतुर्थः सर्गः ॥

www.yousigma.com